International Journal of Sanskrit Research 2020; 6(5): 331-332

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 331-332
© 2020 IJSR
www.anantaajournal.com
Received: 05-07-2020
Accepted: 27-08-2020

**पा. सायि चरणः**
शोधच्छात्रः श्री वेङ्कटेश्वर वेदविश्व विद्यालयः तिरुपतिः आन्ध्र प्रदेशः, भारत।

Corresponding Author:
**पा. सायि चरणः**
शोधच्छात्रः श्री वेङ्कटेश्वर वेदविश्व विद्यालयः तिरुपतिः आन्ध्र प्रदेशः, भारत।

# काण्वाशाखायां अष्टाणां स्वरित भेदानां विचारः

## पा. सायि चरणः

### प्रस्तावना

वैदिक परम्परायां उदात्तादि स्वराणां अत्यन्त प्रामुख्यता वर्तते । या. शिक्षायां "अथात त्रैस्वर्यलक्षणां व्याख्यास्यामः" । इत्यारभ्य उदात्तादि स्वराणां लक्षणं उच्यते । एवं च वा. प्रातिशाख्ये **"उच्चैरुदात्तः"** इत्यादि सूत्रैः एवं वर्णरत्नप्रदीपिका शिक्षायामपि, तेषां विवरणं भवति । ते च त्रयः स्वराः **"उदात्तः","अनुदात्तः","स्वरितश्चैति"** । एतेषु स्वरितस्य अष्टौ भेदाः प्रतिपादिताः तेषां लक्षणं प्रतिशाख्योक्तरीत्य यथामति अधुना विचार्यते ।

**अथ स्वरिते अष्ट भेदाः निरूप्यन्ते**

**श्लोः-"अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणम् ।**

**जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टस्तदनन्तरम्"।।**

**श्लोः-"तैरोव्यञ्जन एवाथ तैरोविराम एव च ।**

**पादवृत्तस्ततस्तद्वत् ताथाभाव्यस्तथाष्टमः।।**

स्वरितस्य अष्ट संख्याकाः भेदाः भवन्ति । पूर्वोक्त प्रकारेण उदात्तनुदात्तसंयोगे स्वरितः उत्पद्यते। द्वयोः धात्वोः सन्धौ धात्वन्तरस्योत्पत्तिरिव । स्वरितभेदाः अष्टसंख्याकाः । तत्तद्वेवप्रातिशाख्यानुसारेण षट् सन्ति । तत्र शिक्षायां स्वरितभेदानां नामानि यथा- जात्यस्वरितः, अभिनिहितस्वरितस्वरः, क्षैप्रस्वरितः, प्रश्लिष्टस्वरितः, तैरोव्यञ्जनस्वरितः तैरोविरामस्वरितः, पादवृत्तस्वरितः, ताथाभाव्यस्वरितः इति।।

**सूः-"एकपदे नीचपूर्वः सयवो जात्यः"** [1] ।

जात्यास्वरूपेणैव उदात्तानुदात्तसंगतिं विना जातः-जात्यस्वरितः ।

एकस्मिन् पदे अनुदात्तपूर्वः एवं संयोगे यकारेण वा वकारेण वा सहितः स्वरितः जात्यः इत्युच्यते । अत्र संयोगेनाम व्यञ्जनानांसमूहः । अत्रानुदात्तपूर्वत्वं एकाक्षरपदेषु न भवति ।

**उदाहरणं- "धान्यम्"** । इत्सस्मिन् पदे अक्षरद्वयं दृश्यते । तयोः आद्यमक्षरं अनुदात्तस्वरयुक्तमस्ति, द्वितीयाक्षरे तु नकारयकारयोः संयोग एवं स्वरितश्च दृश्यते ।

अतः लक्षणोक्तप्रकारेण अनुदात्तपूर्वकत्वं यकारसहितत्वं च वर्तते इति लक्षणसमन्वयः। अनुदात्तपूर्वत्वाभावेऽपि

[1] वा.प्रा. 1,111

एकाक्षरपदे सयवे स्वरितःतत्रापि जात्य एव । यथा- "**स्वः**" इत्यादि।

इतस्त्रयो स्वरितः द्वयोः सन्धौ उत्पद्यते। पदान्तपादाद्योः सन्धिः इत्युक्तदिश पदान्तवर्ण उदात्तः,पदादिवर्णश्चानुदात्तः, तयोः सन्धौ स्वरितः स्वर्यते तत्र प्रथमोऽभिनिहितो यथा-

**सूः-"एदोद्भ्यमकारो लुगभिनिहितः** [2] ।

पदान्तोदात्ताभ्यां एकार-ओकाराभ्यां परः अनुदात्तोऽकारो यस्मिन् सन्धिकार्ये पूर्वरूपं प्राप्य स्वरितः स्वर्यते सः अभिनिहितः।यथा- "ते-अवन्तु" इति स्थिते,तयोः सन्धोः अकारः पूर्वरूपं प्राप्य उदात्तनुदात्तसन्धौ स्वरितस्वर्यते। अत्रोकार विशेषो भवति। पदान्तीय ओकारः संहितायां विसर्गविकाररूपः दृश्यते । "**सर्वो अःकार ओकारम्**" [3] इति सूत्रेण विसर्गस्य अकारे परे ओभावः विहितः ।

**<u>उदाहरणम्-</u> "वेदः।असि"** इति पदद्वयोः सन्धिः दृश्यते । अत्र वेदः इत्यत्र अकारोपधविसर्जनीयः उदात्तस्वरयुक्तः एवं परः अनुदात्त अकारः तयोः सन्धौ स्वरित स्वरःस्वर्यते सः अभिनिहितः।।

**सूः-"युवर्णौ यवौ क्षैप्रः"** [4] ।

पदान्तोदात्ताभ्यां इवर्ण-उवर्णाभ्यां परः असवर्णीयोऽनुदात्तोऽच् सन्धिकार्यैक्रमेण इवर्णस्य यकारत्वं, उवर्णस्य वकारत्वं च प्राप्य यत्र स्वरित स्वरःस्वर्यते सः क्षैप्रःसंज्ञकः इत्युच्यते।

**<u>उदाहरणम्-</u> "वाजी । अर्वन्"** इति पदद्वयसंयोगे वाज्यर्वन् इति क्षैप्रस्वरितः सिध्यति। तद्यथा- वाजी इत्यस्य पद ईकारः उदातः एवं उत्तर पदादिवर्णः अनुदात्तोऽकारः एतयोः सन्धौ इकारस्थाने यकारः एवं अनुदात्तस्थाने स्वरितः इति । अत्रवशेषः उदात्तस्थीभावे स्वरितंपपमनुदातम् । इति सूत्रात् उदात्तस्वरयुक्तस्व अन्तस्थीभावे परस्यानुदात्तस्यैव स्वरितः। न तु उदात्तानुदात्तसन्धौ । एवंरूपस्वरितः क्षैप्रः इत्युच्यते ।

**सूः- "इवर्णमुभयतो ह्रस्वः प्रश्लिष्टः"** [5] ।

स्वरयोः ह्रस्व इकारयोः उदात्तानुदात्तयोः सन्धौ प्रश्लिष्टस्वरितः उत्पद्यते । अयं स्वरितः पदायोः सन्धौ एवं पदमध्येऽपि दृश्यते। यथा-

**<u>उदाहरणम्</u>** – अभि । इन्धताम् इतिस्थिते द्वयोः ह्रस्व इकारयोः उदात्तानुदात्योः सन्धौस्वरितः इति । अभीन्धताम् । पदमधये यथा- स्रुचीवेतिस्रुचि-इव । पूर्वक्ताश्चत्वारो स्वरिताः नित्यस्वरिता इत्युच्यन्ते । यतस्ते उदात्तानुदात्तसंयोगोनोत्पद्यन्ते ये स्वरिता इतः प्रभृति निस्प्यन्ते ते अनुदात्तविकाररूपा इति ज्ञेयाः ।

**सूः-"स्वरो व्यञ्जनयुत्तस्तैरोव्यञ्जनः"** [6] ।

उदात्तपूर्वः व्यञ्जनयुक्तस्वरितः तैरोव्यञ्जनस्संज्ञस्यात् ।

**<u>उदाहरणम्-</u>** इळे,रन्ते,चन्द्रे,ज्योते, इत्यादि । अत्र इळे इति पदे इकारपूर्वकः डकाररूप ळकार सहित उदात्त एकारः स्वरितः भवति ।

लक्षण प्रकारेण अत्र तैरोव्यञ्जन स्वरित स्वरः स्वर्यते इति विज्ञेयाः।

**सूः-"उदवग्रहस्तैरोविरामः"** [7]।

अयं स्वरितस्वरः पदकाले एव ज्ञायते । अत्रावग्रहशब्देव वेष्टने इतिपदात् पृथक्कृतयोः द्वयोः पदयोः पूर्वपदं गृह्यते।अवग्रहे उदात्तः एवं उत्तरपदे स्वरितः भवति चेत् तत्र तैरोविरामस्वरित स्वरः इति विज्ञेयः।

**<u>उदाहरणम्</u>** – प्रजापतिरितिप्रजा –पतिः । इति स्थिते इतिकाणात् पृथक्करणयोः पूर्वपदान्ते उदात्तः उत्तरपदे स्वरितः इति। अयं स्वरितः पदकाले भवति ।

लक्षणोक्तप्रकारेण अत्र तैरोविराम स्वरितस्वरः स्वर्यते इति ज्ञातव्यः ।

**सूः-"विवृत्तिलक्षणः पादवृत्तः"** [8] ।

यत्र स्वरयोःमध्ये सन्धेः अवकाशस्थितेऽपि सन्धिर्नदृश्यते तत्र विवृत्तिः इत्युच्यते ।

विवृत्यालक्ष्यते इति विवृत्तिलक्षणः ।

**<u>उदाहरणम्</u>** –का। ईमरे। अत्र पूर्व पदान्त वर्णः उदात्त उत्तर पदादि वर्णः स्वरितो भवति स स्वरितः पादवृत्तस्संज्ञकस्यात्।

एवं रूपेण प्रातिशाख्ये वर्णरत्नप्रदीपिका शिक्षा च अष्टस्वरितानां लक्षणं तेषां उच्चारण वैविध्यं च प्रस्तुतम् ।।

**आधाराग्रन्थसूची**

1. वाजसनेयीप्रातिशाख्य
2. याज्ञवल्क्य शिक्षा
3. वर्णरत्नप्रदीपिका शिक्षा

---

[2] वा.प्रा. 1,114
[3] वा.प्रा. 4,42
[4] वा.प्रा.1,115
[5] वा.प्रा.1,116
[6] वा.प्रा.1,117
[7] वा.प्रा.1,118
[8] वा.प्रा.1,119